## सुखादिभ्यः कर्तृवेदनायाम् । (१८/२६७४)

कर्मग्रहणमनुवर्तते[1] । सुख इत्येवमादिभ्यः कर्मभ्यः [2]वेदनायामर्थेऽनुभवे क्यङ प्रत्ययो भवति, वेदयितुश्चेत् कर्तुः [3]सम्बन्धीनि सुखादीनि भवन्ति । सुखं वेदयते सुखायते । [4]दुःखायते । कर्तृग्रहणं किम् ? सुखं [5]वेदयते प्रसाधको देवदत्तस्य (म.भा. २.२६) ।

सुख । दुःख । [6]तृप्त । गहन । कृच्छ्र । [7]अस्र । अलीक । [8]प्रतीप । करुण । कृपण । सोढ । [9]सुखादिः ॥

## नमोवरिवश्चित्रङः क्यच् । (१९/२६७५)

करणे इति वर्तते ।[10]नमस् वरिवस् चित्रङ इत्येतेभ्यो [11]वा क्यच प्रत्ययो भवति, करणविशेषे पूजादौ । नमसः पूजायाम् –– नमस्यति [12]देवान् । वरिवसः परिचर्यायाम् –– वरिवस्यति गुरून् । चित्रङ आश्चर्ये– चित्रीयते । ङकार आत्मनेपदार्थः ॥

## पुच्छभाण्डचीवराण् णिङ् । (२०/२६७६)

करणे इति वर्तते । [13]पुच्छ भाण्ड चीवर इत्येतेभ्यो णिङ प्रत्ययो भवति करणविशेषे ।

[१९५] पुच्छादुदसने पर्यसने वा । (म.भा. २.२७)

[14]उत्पुच्छयते । परिपुच्छयते ।

[१९६] भाण्डात् समाचयने । (म.भा. २.२७)

सम्भाण्डयते[15] ।

[१९७] चीवरादर्जने परिधाने [16]वा । (म.भा. २.२७)

[17]सञ्चीवरयते भिक्षुः । ङकार आत्मनेपदार्थः । णकारः सामान्यग्रहणार्थः, 'णेरनिटि' (६.४.५१/ २३१३) इति ॥

---

1. इह इत्यधिकम् ह. 2. कर्तृ इत्यधिकम् अ. 3. सम्बन्धीनि नास्ति ह. 4. दुःखं वेदयते इत्यधिकम् क. 5. वेदयति मुद्रितः पाठः 6. तीव्र क, गहन नास्ति ब. फ. 7. प्रिय आप्त इत्यधिकम् क. ड, आह्व इत्यधिकम् ब. 8. प्रदीप फ. 9. सुखादीनि क. 10. नमसादिभ्यः फ. 11. वा नास्ति ड. फ. 12. महेश्वरं फ. 13. पुच्छादिभ्यः फ. 14. उत्पुच्छायते । परिपुच्छायते ग, णौ इष्ठवत् प्रातिपदिकस्य इति टिलोपः इत्यधिकम् ड. 15. कुलालः इत्यधिकम् ह. 16. च ड. 17. वासः इत्यधिकम् ब. ई.